# SA-II/1/22SAS4CCTC1/24

## चतुर्थसत्रार्द्धः

## प्रथमपत्रम्

## वैयक्तिकविकासार्थं मनोविज्ञानम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन पञ्च प्रश्ना एव समाधेयाः।** **05 (प्रश्नः) × 05 (अङ्कः) = 25**

1. मानवविकासस्य सम्प्रत्ययः कः? इति लिखत।
2. वैयक्तिकविकासे अन्तर्वृत्तेः प्रभावः कीदृशः? इति निरूपयत।
3. संवेदनायाः स्वरूपं लिखत।
4. कुण्ठायाः मापनोपायान् लिखत।
5. कुसमायोजनस्य समस्याः काः?
6. मानवतावादस्य किं वैशिष्ट्यम्?
7. संज्ञानात्मकवादस्य अभिप्रायः कः?

### खण्डः – ख

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

8. वैयक्तिकभिन्नतायाः सम्प्रत्ययं विलिख्य वैयक्तिकविकासे बुद्धेः प्रभावं निरूपयत।
9. समूहगत्यात्मकतायां प्रत्यक्षस्य स्वरूपं प्रतिपादयत।
10. तन्यतायाः सम्प्रत्ययं निरूप्य प्रकारान् प्रतिपादयत।

### खण्डः – ग

**एकः प्रश्न एव समाधेयः।** **01 (प्रश्नः) × 15 (अङ्कः) = 15**

11. छात्रस्य उपलब्धौ सामाजिकवातावरणस्य कक्ष्यावातावरणस्य च प्रभावं वर्णयत।
12. संज्ञानात्मकवादस्य तात्पर्यं निरूप्य मनोविज्ञानस्य सम्प्रदायेषु तस्य वैशिष्ट्यं विवेचयत।

# SA-II/2/22SAS4CCTC2/24

## चतुर्थसत्रार्द्धः

## द्वितीयपत्रम्

## अध्यापकशिक्षा

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन पञ्च प्रश्ना एव समाधेयाः।** **05 (प्रश्नः) × 05 (अङ्कः) = 25**

1. उच्चशिक्षायाम् अध्यापकशिक्षायाः उद्देश्यानि कानि?
2. अध्यापकानां भूमिकापरिवर्तनं संक्षेपेण वर्णयत।
3. विद्यालयीयाध्यापकानां वृत्तिनियमाः के?
4. अध्यापकानां वृत्तिसंहितां विवृणुत।
5. अर्वाचीनकाले संस्कृताध्यापकशिक्षायाः स्वरूपं निरूपयत।
6. राष्ट्रियशिक्षायोगे 1964-66 (कोठारी आयोगे) अध्यापकशिक्षासन्दर्भे संस्तुतयः काः सन्ति?
7. अध्यापकानां सामाजिकस्थितिं निरूपयत।

### खण्डः – ख

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

8. वृत्तिरूपेण शिक्षणम् इत्यस्य भारतीयसम्प्रत्ययं स्पष्टयत।
9. अध्यापकशिक्षायाः इतिहासं संक्षेपेण लिखत।
10. संस्कृताध्यापकशिक्षायां केन्द्रीयसंस्कृतविश्वविद्यालयः नवदेहली इत्यस्य भूमिकां विशदयत।

### खण्डः – ग

**एकः प्रश्न एव समाधेयः।** **01 (प्रश्नः) × 15 (अङ्कः) = 15**

11. अध्यापकशिक्षायाः महत्त्वं स्पष्टीकृत्य भारते प्राचीन-संस्कृताध्यापकशिक्षां प्रतिपादयत।
12. अध्यापकशिक्षायां "राष्ट्रियशिक्षानीतिः 1986" इत्यस्य प्रभावं स्पष्टयत।

# SA-II/3/22SAS4EDTC3A/24

## चतुर्थसत्रार्द्धः

## तृतीयपत्रम्

## पाठ्यचर्यायाः अध्ययनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन पञ्च प्रश्ना एव समाधेयाः।** **05 (प्रश्नः) × 05 (अङ्कः) = 25**

1. पाठ्यचर्यायाः अर्थं सम्प्रत्ययञ्च प्रतिपादयत।
2. पाठ्यचर्यायाः विकासस्य व्यावसायिकं प्रतिमानं निरूपयत।
3. छात्राणां समग्रविकासाय पाठ्यचर्या कथमुपयोगिनी ?
4. व्यवस्थितज्ञानकौशलत्वेन पाठ्यचर्या कथं भवेत् ?
5. पाठ्यचर्या-आधिक्यस्य समस्यां निरूपयत।
6. पाठ्यचर्यायाः विषयकेन्द्रितोपागमाः के ?
7. पाठ्यचर्याविकासे के विषयाः ध्यातव्याः ?

### खण्डः – ख

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

8. पाठ्यचर्यायाः विकासे अध्येतृकेन्द्रितोपागमः कः ? वर्णयत।
9. पाठ्यचर्यानिर्माणस्य दार्शनिक-वैचारिकाधारयोः स्पष्टीकरणं दत्त।
10. संस्कृतसंवर्धनाय भविष्योन्मुखी पाठ्यचर्या कीदृशी भवेत् ? सकारणं प्रतिपादयत।

### खण्डः – ग

**एकः प्रश्न एव समाधेयः।** **01 (प्रश्नः) × 15 (अङ्कः) = 15**

11. केन्द्रीकृत-विकेन्द्रीकृतपाठ्यचर्ययोः अन्तः सम्बन्धं विवृणुत।
12. पाठ्यचर्याविकासस्य व्यावसायिकं प्रशिक्षणात्मकञ्च प्रतिमानम् उपस्थापयत।

# SA-II/3/22SAS4EDTC3B/24

## चतुर्थसत्रार्द्धः

## तृतीयपत्रम् (ऐच्छिकम्)

## शैक्षिकं व्यावसायिकं च निर्देशनम्

**समयः घण्टाद्वयम्** **पूर्णाङ्काः 60**

### खण्डः – क

**केचन पञ्च प्रश्ना एव समाधेयाः।** **05 (प्रश्नः) × 05 (अङ्कः) = 25**

1. निर्देशनस्य स्वरूपम् किम्?
2. पुरातनच्छात्रसंगोष्ठी (Alumni Meeting) किमर्थम् आयोज्यते?
3. व्यावसायिकनिर्देशनस्य उद्देश्यानि कानि?
4. केषाञ्चन मानकीकृतपरीक्षणानां नामानि लिखत।
5. हालैंडमहोदयानुसारं व्यावसायिकविकासावस्था का?
6. आजीविकासूचनासङ्कलनस्य मुख्यप्रविधीनां नामानि लिखत।
7. वैयक्तिकनिर्देशने अवधेयाः विषयाः के?

### खण्डः – ख

**द्वौ प्रश्नौ एव समाधेयौ।** **02 (प्रश्नः) × 10 (अङ्कः) = 20**

8. वृत्तिचयने बालकेषु व्यावसायिकनिर्देशनस्य कः प्रभावः भवति? लिखत।
9. व्यावसायिकसूचनाप्राप्त्यर्थं वृत्तिवार्ता वृत्तिसंगोष्ठी च कथम् उपयुज्येते? विशदयत।
10. वैयक्तिक–सामूहिकनिर्देशनयोः को भेदः? सोदाहरणं स्पष्टयत।

### खण्डः – ग

**एकः प्रश्न एव समाधेयः।** **01 (प्रश्नः) × 15 (अङ्कः) = 15**

11. शैक्षिकनिर्देशनस्य प्रमुखाः सिद्धान्ताः के? विशदयत।
12. आजीविकासूचनायाः सङ्कलनाय अमानकीकृत–मानकीकृतपरीक्षणयोः भेदं विलिख्य समाजमितिपरीक्षणं (Sociometry) सोदाहरणं विवृणुत।